International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665

# ब्रह्मचर्याश्रमसामान्यविषयाः

**Dr. Bandi Chaitanya Kumar**
**Contract lecturer in Sankrit**
**S.G.V Oriental College.**
**Ph. No. - 9676113384**

ब्रह्मचर्याश्रमे उपनयनं तदाश्रमप्रवेशहेतुस्त्रैवर्णिकानां भेदकं च भवति। ब्राह्मणस्य उपनयनकालस्तु गर्भाष्टमे वर्षे भवति। सप्तमवर्षसमाप्तेरनन्तरमष्टमे वर्षे प्रथममासद्वयप्रयत्नः कालः उपनयनयोग्य इत्यर्थः। प्रायशस्सप्तमे वर्षे एव जननादारभ्य ब्राह्मणस्योपनयनकालः। यो ब्रह्मवर्चसकामस्योपनयनकालमङ्गीकृतवान्।[1] उपनयनकालावधिरपि तत्तद् वर्णानां निश्चितो मनुना। षोडशवर्षानन्तरं ब्राह्मणो गायत्रीमन्त्रजपं कर्तुमनह भवति। एवं द्वाविंशतिवर्षाणामनन्तरं क्षत्रियस्य, चतुर्विंशतिवर्षाणामनन्तरं वैश्यस्य गायत्रीजपाधिकारः लुप्तो भवति। अतस्स्व स्व कुलविहितोपनयनकालादारभ्य अनर्हताप्राप्तिपर्यन्तो यः कालः स्वकुलस्य विद्यते आपद्धर्मेणापि तस्मिन्नेव काले उपनयनकर्म विधीयते। एवमतीते उपनयनकाले ये असंस्कृतास्त्रैवर्णिकास्तैस्सह विवाहादिसम्बन्धो न कार्यः।

## ब्रह्मचारिणः आहार्यम्

वर्णानुसारेण ब्रह्मचारिणो मौञ्जीमेखलादिभेदो भवति। दण्डप्रमाणेऽपि तेषां भेदो भवत्येव। ब्राह्मणब्रह्मचारी कृष्णरुरुचर्मकृतमुत्तरीयं बिभृयात्। शणसूत्रवस्त्रधारणं च कुर्यात्।एवं त्रिपुरता मौजी मेखलारूपेण स्वीकुर्यात्। मुञ्जालाभे कुशमेखला ब्राह्मणेन धार्या। कार्पासम् उपवीतं ब्राह्मणेन धार्यम्। ब्राह्मणस्य बैल्वपालाशौ दण्डी विहितौ अर्थात् बिल्ववृक्षदारुमयः पलासवृक्षदारुमयो वा दण्डो ब्राह्मणेन धार्यः। ब्राह्मणस्य दण्डः केशान्तिकप्रमाणवान् स्यात्। एवं मौञ्जी मेखलादीन्

धृत्वा गुरुकुले वसन् भिक्षाचरणेन वृत्तिं कल्पयेत्। तत्र ब्राह्मणों भवत्शब्दमादावुच्चार्य भिक्षां याचेत्। यथा भवति भिक्षां देहि ' इति, 'भवान् भिक्षां देहि' इतिवा।

क्षत्रियब्रह्मचारिणः मौर्वीज्या मेखला भवति मुर्वनामकतृणविशेषेण निर्मिता रज्जुः इत्यर्थः। अश्मन्तकतृणैः अर्थात् काशतृणैः निर्मिता मौजी मौर्व्याः अलाभे क्षत्रियेण धार्या। एवं क्षत्रियः शणसूत्रनिर्मितयज्ञोपवीती भवति वटशाखा खदिरशाखा वा दण्डार्थं क्षत्रियेण उपयोज्या। स च दण्डो ललाटसम्मितः स्यात्।

वैश्यस्य शणतन्तुनिर्मिता माँझी भवति। तदलाभे बिल्वनिर्मिता वा भवति। मुस्तामयी इत्यर्थः। वैश्यस्य पीलुदण्डः उदुम्बरदण्डो वा भवति। स च दण्डो नासिकाप्रमाणसम्मितः भवेत्। सर्वेषां दण्डः, सर्वे च दण्डाः ऋजवः, अव्रणाः अनुद्वेगकराश्च भवेयुः स्पष्टप्रतिपत्तये त्र्याणां वर्णानामाहार्यविशेषः पृथक्कृत्य दर्शितः मनुस्तु सर्वेषां मौजीप्रभृतीनां लक्षणं पृथक् निरूप्य मौज्जीप्रभृतीनां प्रत्येकं लक्षणमुक्तवान्। एते विषयाः अत्रस्थश्लोकेषु निरूपिताः

**नैतैरपूतैः विधिवदापद्यपि हि कर्हिचित्।**

**ब्राह्मान् यौनांश्च सम्बन्धान्नाचरेद् ब्राह्मणस्सह॥**

**कार्यं रौरवबास्तानिचर्माणि ब्रह्मचारिणः।**

**वसीरन्नानुपूर्व्येणशौणक्षौमाविकानि च ॥**

**मञ्जी त्रिवृत्समाश्लक्ष्णाकार्या विप्रस्य मेखला।**

**क्षत्रियस्य तु मौर्वीज्यावैशस्य शणतान्तवी ॥**

**मुञ्जलाभे तु कर्तव्याःकुशाश्मन्तकबल्बजैः**

**त्रिवृता ग्रन्थिनैकेनत्रिभिः पञ्चभिरेव वा ॥**

**कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृत्तं त्रिवृत्।**

**शणसूत्रमयं राज्ञोवैश्यस्याविकसौत्रिकम् ॥**

**ब्राह्मणो बैल्वपालाशौक्षत्रियो वाटखादिरौ।**

**पैलवौदुम्बरौ वैश्योदण्डानर्हन्ति धर्मतः ॥**

**केशान्तिको ब्राह्मणस्यदण्डः कार्यः प्रमाणतः।**

**ललाटसंमितो राज्ञःस्यात्तु नासान्तिको विशः ॥**

**ऋजुवस्ते तु सर्वे स्युःअव्रणाः सौम्यदर्शनाः।**

**अनुद्वेगकरा नृणांनत्वचो नाग्निदूषिताः ॥**[2]

कुल्लूकभट्टेन यज्ञोपवीत धारणे मतभेदो दर्शितः अद्य ब्रह्मचारिणा त्रिसूत्रमयमैकग्रन्थि उपवीतं मनुना निरूपितमेव धार्यते। छान्दोग्यदेवलप्रभृतिभिः नवसूत्रमयं त्रिग्रन्थि पञ्चदशसूत्रमयं पञ्चग्रन्थि उपवीतं धार्यमिति निरूपितम्। इदानीं गृहस्थैः केषुचिन्मण्डलेषु पञ्चदशसूत्रमयं पञ्चग्रन्थि उपवीतं धार्यते विशेषतः उभयगोदावरी, विशाख, श्रीकाकुल, विजयनगरमण्डलेषु आन्ध्रदेशे एवंविधस्य यज्ञोपवीतस्य धारणं दृश्यते ब्रह्मचारिणस्तु त्रिसूत्रं यज्ञोपवीतमेव भारतदेशे सर्वत्र दृष्टम् यज्ञोपवीतादिषु मतभेदनिरूपणार्थं कुल्लूकभट्टव्याख्याप्युदाह्रियते।

यदीयविन्यासविशेषस्योपवीतसंज्ञां वक्ष्यति तद्धर्मि ब्राह्मणस्य कार्पासं, क्षत्रियस्य शणमात्रमयं वैश्यस्य मेषलोमनिर्मितं त्रिवृतिरिति त्रिगुणं कृत्वा ऊर्ध्वं वृतं

दक्षिणावर्तितम्। एतच्च सर्वत्र सम्बध्यते यद्यपि गुणत्रयमेवोर्ध्वं वृतं मनुनोक्तम्, तथापि तत्र त्रिगुणीकृत्य त्रिगुणं कार्यम्। तदुक्तं छन्दोगपरिशिष्टे ऊर्ध्वं तु त्रिवृतं कार्यं तन्तुत्रयमधोवृत्तं, त्रिवृतं चोपवीतं स्यात् तस्यैको ग्रन्थिरिष्यते। देवलोऽप्याह –

**यज्ञोपवीतं कुर्वीत सूत्राणि नव तन्तवः।**[3]

**भिक्षाचरणम् -**

ब्रह्मचारी सातवर्णिकोऽपि भैक्ष्येणैव वृत्तिं कुर्यात्। मातुरसकाशात्, स्वसुस्सकाशात्, मातुर्भगिनी सकाशाद्वा प्रथमां भिक्षां विन्देत। भिक्षान्नं या याचकं संपूज्य ददाति सैव भिक्षां दातुमर्हति एवं सम्पादितं भैक्ष्यमत्रं प्रथमं गुरवे निवेद्य तेनानुज्ञातो भुञ्जीत यदि शिष्येणाहतम् अन्नं गुरुरिच्छति तदा भैक्ष्यं गुरवे एव देयम्। यद्वा तेनानुज्ञातो भुञ्जीत। प्रथममाचम्य पराङ्मुखो भुञ्जीत। भोजनकाले यस्याः दिशः अभिमुखो यद् फलमश्नाति तदपि मनुना दर्शितम्। भुक्त्वा अपामुपस्पर्शनं कुर्यात्। अन्नमनिन्दन् भुञ्जीत पूजितमन्नं बलप्रदं भवति। अपूजितं भुक्तं स्वस्य नाशहेतुर्भवति उच्छिष्टं कस्मै अपि न दद्यात्। एवमत्यशनं न कुर्यात्। एते विषयाः अत्रस्थश्लोकरत्नेषु प्रतिपादिताः।

**भवत्पूर्वं चरेद् भैक्ष्यमुपनीतो द्विजोत्तमः।**

**भवन्मध्यन्तु राजन्योवैश्यस्तु भवदुत्तरम् ॥**

**मातरं वा स्वसारं वामातुर्वा भगिनीं निजाम्।**

**भिक्षेत भिक्षां प्रथमंया चैनं नावमानयेत् ॥**

**समाहृत्य तु तद्भैक्षंयावदर्थममायया।**

**निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखश्शुचिः ॥**

आयुष्यं प्राङ्मुखो भुङ्गेयशस्य दक्षिणामुखः

श्रियं प्रत्यङ्मुखो भुङ्गेऋतं भुङ्गे ह्युदङ्मुखः ॥

उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः।

भुक्त्वा चोपस्पृशेत् सम्यगद्भिः खानि च संस्पृशेत् ॥

पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्

दुष्येत्प्रसीदेच्चप्रतिनन्देच्च सर्वशः ॥

पूजितं ह्यशनं नित्यंबलमूर्जं च यच्छति।

अपूजितं तु यद्भुक्तमुभयं नाशयेदिदम् ॥

नोच्छिष्टं कस्यचिद्दद्यात्राद्याच्चैव तथान्तरा।

नवैवात्यशनं कुर्यान्नचोच्छिष्टः क्वचिद् व्रजेत्॥[4]

References

1. नवमे पञ्चमे वा काम्यम्
2. मनु – अ. 2, श्लोकः – 40-47, पृ. - 47
3. मनु. – अ. – 2, श्लोकः – 44 व्याख्या, पृ. – 47,48
4. मनु. – अ – 2 – श्लो. – 49-56, पृष्ठा – 49-50